10.53957/sanshodhan/2022/v11i1/169794

# नाट्यं समाराधनम्

प्रा. डॉ. विभा क्षीरसागर

'नाटकम्' इत्येनं शब्दमेव न जानाति तादृशाः जनाः विरलाः एव। व्यवहारे "अलं नाट्येन! बहु नाटयति एषः!" एतादृशैः उद्गारैः नाट्यं सर्वख्यातमिति ज्ञायते। अद्यत्वे सर्वत्र महती चर्चा नाट्यस्य। विभिन्ननाट्यस्पर्धायोजनं स्पर्धापरिणामाः, कुत्रचित् आनन्दः, कुत्रचित् नीरसता स्पर्धापरिणामेन एतत्सर्वं वयम् अनुभवामः। वस्तुतः नाटकम् इत्येका पवित्रा सङ्कल्पना। नाट्यलेखकः, दिग्दर्शकः, अभिनेतारः, रङ्गभूषाकारः, प्रकाशयोजकः, सङ्गीतयोजकः, सहायकाः, वस्तुविक्रेतारः, वाहनरक्षकाः नाट्ययशसे प्रयतमानाः एते सर्वे शिवस्वरूपाः।

**व्याख्या** – णन् नृतौ धातुतः 'नाटक' इति शब्दोत्पत्तिः। यस्याशयोऽस्ति अभिनेता। यस्मिन् अभिनयं कुर्वाणाः कलाकाराः तन्नाटकम्। नाटकप्रकरण- भाणव्यायोगवीथि-इत्यादिषु दशप्रकारेषु 'नाटकं प्रधानमस्ति। यतः नाटके नाट्यशास्त्रस्वीकृतरसाष्टकं विद्यते इति सूचयति धनञ्जयाचार्यः।

**प्रकृतित्वादथान्येषां भूयोरसपरिग्रहात्।**
**सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते।।१**

'नाटकम्' इति अस्ति पञ्चमः वेदः। अस्य पञ्चमवेदस्य सम्भवः साक्षात् ब्रह्मदेवतः।

**नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।**
**लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।।२**

लोकेषु ये सन्ति विभिन्नभावाः, भिन्नभिन्नावस्थाः, धटनाः, प्रसङ्गाः, लोकजीवनं, लोकस्वभावः एतेषां समेषां प्रतिबिम्बं दृश्यते नाट्ये।

**दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद्भविष्यति।।३**

जीवने दु:खशोकश्रान्ततानिवारकमस्ति नाटकम्। न केवलं सामान्यजनानाम् अपि तु तापसानां कृतेऽपि विश्रान्तिसुखदमस्ति नाटकम्।

Mobile : +91 96577 67396
Email : vibhashirsagar@rediffmail.com

**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।**

**लोकोपदेशजननं नाट्यमेतद्भविष्यति।।४**

नाट्येन किं कर्म किमकर्मेति अवबोधः, नाट्येन जीवने यशः, नाट्यम् आयुर्वर्धकं, नाट्यं हितकरं, नाट्येन बुद्धिवर्धनं, नाट्येन लोकप्रबोधनम् एतादृशाः लाभाः भवन्ति।

**न तज्ज्ञानं तच्छिल्पं न सा विद्या न सा कला।**

**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।५**

जीवनविषयकं प्रदर्शनं नाट्ये। ज्ञानशिल्पविद्याकलायोग-सर्वप्रकारकर्म-सर्वेषां प्रदर्शनं नाट्ये।

**आधारः**

नाट्यलेखने नाट्यकारस्य अक्ष्णोः पुरतः साकारं भवति नाट्यदृश्यम्। यथा प्रयोगोपयोगविधिः, रङ्गमञ्चः, रङ्गमञ्चे प्रसङ्गाः। एतत्सर्वं प्रातिभम्। नाट्ये अभिनेता भूमिकां निर्वहति। तदस्ति विभावनम्। वि - विना, भावनम् - अस्तित्वम्। उदा. प्रभुरामचन्द्रस्य भूमिकां कुर्वाणः अभिनेता एव रामः इति रसिकानुभवः। अभिनेता अभिनयेन रसं निर्माति। तेन प्रस्तुतप्रसङ्गैः सह रसिकानां तादात्म्यम्। इत्यस्य आशयोऽस्ति प्रत्यक्ष रामेण विना अभिनयमाध्यमेन श्रीराम सहृदयरसिकानां पुरतः तिष्ठति। एतदस्ति विभावनम्। नाट्ये सर्वमस्ति प्रातिभम्। एषः आधारः अस्ति नाटकस्य।

**आवश्यकता**

बृहदारण्यकोपनिषदि 'आत्मा वाऽरे दृष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः६ इत्येकं वचनमस्ति। इत्यस्याशयोऽस्ति उपनिषद्ग्रन्थाः आत्मचिन्तनाय प्रेरयन्त्यस्मान्। तथा प्रयतिते सति नैकेषामभावानामनुभवः। यथा धनाभावः, समाधानाभावः, समुपदेशनाभावः, रञ्जनाभावः। नात्र देवानामपि अपवादः। 'शिव' 'शिवा' अस्ति 'परा' विद्या। परमेतावुभावपि मनोविनोदनार्थं क्रीडनकमैच्छताम्। ताभ्यामभिमतं नाट्यम्। अनन्तरं पार्वत्या सह स्वस्य अर्धनारीश्वररूपे ताण्डवं लास्यं चेति नाटकं द्विधा विभक्तं शङ्करेण। नाटके सत्त्वरजतमेति त्रिगुणात्मकं लोकचरितं अष्टरसैः दृश्यते। एषः नाट्ययज्ञः देवानां कृते एकः सुन्दरः चाक्षुषः यज्ञः अस्ति इत्यभिप्रैति कविकुलगुरु- कालिदासः। नाटकं भिन्नरुचीनां भिन्नवयस्कानां भिन्नस्तरीयानाञ्च जनानां मनांसि युगपदेव समाकर्षति।

**देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्।**

**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**

**त्रैगुण्योद्भवमत्र लोकचरितं नानारसैर्दृश्यते**

**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।।७**

'आत्मनः कामाय सर्वं भवति हि प्रियम्'६ इत्यस्ति श्रुतिवचनम्। अहं मम पुत्रे स्निह्यामि। यतः मयि विद्यमानमात्मतत्त्वं नन्दति। गीतायां क्षेत्रक्षेत्रज्ञविभागयोगेऽध्याये अथवा 'देही नित्यमवध्योऽयं देहे सर्वस्य भारत' इति द्वितीये अध्याये अथवा ईश्वरः सर्वभूतानां हृद्देषेऽर्जुन तिष्ठति इति अष्टादशेऽध्याये आत्मतत्त्वं प्राणिशरीरे विद्यमानमस्ति इति सूचितमस्ति। अस्माकं पक्षतः यदा उत्तमं कर्म अथवा लोककल्याणप्रयत्नः सम्भवति तदा वयम् एकम् अलौकिकमानन्दमनुभवामः। स एवास्ति आत्मानन्दः। अस्य आत्मनः आनन्दाय भिन्नभिन्नविषये अस्माकं स्नेहः। यस्मादानन्दः स विषयः प्रियः। नाट्येन रसनिष्पत्तिः अर्थात् आनन्दप्राप्तिः। अतः नाट्यमस्ति प्रियम्।

काव्येषु नाटकं रम्यम्। यतः नाट्यमाध्यमेन निरक्षरेष्वपि सद्गुणारोपणं शक्यम्। मनोरञ्जनमाध्यमेन सद्विचारसङ्क्रमणं शक्यम्। अलौकिकानन्दानुभूतिः इति तु नाट्येन भवत्येव। लोकजीवनमेव नाट्ये चित्रितं भवति। अत एव भरतमुनिः 'नाट्यं लोकवृत्तानुकरणम्'६ इति वदति। एतेनैव नाट्यमस्मज्जीवनसम्बन्धितमिति चिन्तयति लोकाः। तेनैव नाट्यविषये लोकानामाकर्षणम्।

आबालवृद्धसधननिर्धनानां कृते नाटकमानन्ददायकम्। को नेच्छति आनन्दम्? जीवने तानवं ;ज्मदेपवदद्धण विभिन्नसमस्याः एतत्सर्वमुद्विजति मनुष्यम्। मनःप्रसादनमावश्यकं जीवने। यतः चित्ते प्रसन्ने भुवनं प्रसन्नं चित्ते विषये भुवनं विषण्णम्। अतः यदि सुखाभिलाषः अस्ति तर्हि चित्तप्रसादाय यतनीयम्। नाटकं चित्तप्रसादकम्। अतः नाट्ययशसे प्रयतनीयम्।

**फलप्राप्तिः**

**या गतिर्वेदविदुषां या गतिर्यज्ञकारिणाम्।**
**या गतिर्दानशीलानां तां गतिं प्राप्नुयाद्धि सः।।१०**

वेदज्ञानेन अथवा कर्मकाण्डीययज्ञानुष्ठानेन या फलप्राप्तिः अथवा दानकर्मणा यत्फलं लभते तदेव फलमाप्नोति नाट्ययज्ञेन। परमेतदत्र अवधातव्यं यत् यज्ञानुष्ठाने यथा शास्त्रादेशपालनं, शुचिता, तत्परता - इत्यादीनामनुसरणमावश्यकं तथैवनाट्ययज्ञेऽपि। तेनैव फलमाप्नुयात्।

**पावित्र्यम्**

श्रीमद्भगवद्गीतायां सप्तमे अध्याये

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।**
**अपरेयामितस्त्वन्यां प्रकृतिः विद्धि मे पराम्।**
**जीवभूतां महाबाहो ययेदं धार्यते जगत्।।११**

एनयोः श्लोकयोः भगवता स्वस्य परा अपरा चेति प्रकृतिद्वयं वर्णितम्। परा-परब्रह्मवाचकतत्त्वम्। परातः एव अपरा। सर्वप्राणिसृष्टिः, वनस्पतिसृष्टिः, सृष्टेः शारीरिकमानसिकचेष्टाः, सृष्टेः अस्मिता, उद्भवः एषा अस्ति अपरा प्रकृतिः। परापरातः एव विश्वप्रपञ्चः। विश्वस्य बीजमस्ति ईश्वरः।

यच्चापि सर्वभूतानां बीजं तदहमर्जुन। अस्य ईश्वरस्य सान्निध्यं तदावगम्यते यदा वयं किमपि उत्तमं जनकल्याणकरं कार्यं कुर्मः, भव्योदात्तमैश्वर्ययुतं पश्यामः। सत्कथापरकनाटकात् जनकल्याणं, भव्योदात्तस्य च दर्शनम्। इत्यतः नाट्यमपि ईश्वरस्यैव विभूतिः।

**नान्तोऽस्ति मम दिव्यानां विभूतिनां परन्तप।१३**

ईश्वरस्य धर्मः अस्ति आनन्दः। नाटकेन रसनिष्पत्तिः अर्थात् आनन्दः। अतः नाटकमस्ति ईश्वरीयविभूतिः। दृष्ट्यानया नाटकमित्येका पवित्रासङ्कल्पना।

नाट्यशास्त्रे येषां विषयाणामुपदेशः तस्य सूत्रमस्ति 'भरत'। भरत इति एकं सङ्घटनमस्ति। सङ्घटनेऽस्मिन् नैके स्त्रीपुरुषाः कार्यरताः सन्ति। एते रङ्गमञ्चे श्रुङ्गारं प्रदर्शयेयुः परं प्रत्यक्षजीवने ते सन्ति अनासक्त योगिनः। एतदस्ति पावित्र्यं नाट्यस्य।

नाटकमस्ति अष्टरसात्मकम्। वस्तुतः रसः तु एकः एव। तमेकं रसं प्राप्तुं एते अष्टरसाः सोपान इव। रससङ्ख्या अस्ति अष्ट। अस्य कारणमस्ति सम्पूर्णं मायिकविश्वं शिवस्य अष्टमूर्तिभिः निर्मितमस्ति।

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री।**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः।**
**प्रत्यक्षाभिस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।१४**

अभिज्ञानशाकुन्तले नान्द्यामस्यां शिवस्य अष्टमूर्तयः वर्णिताः सन्ति। अष्टरसात्मकनाटकमपि शिवस्वरूपमेव। काश्मीरीयः अभिनवगुप्ताचार्यः वदति यत् नाटकमस्ति 'महाशिवम्' इति। नाट्यलेखकः, दिग्दर्शकः, अभिनेतारः, सङ्गीतप्रकाशवेशभूषाकाराः, वस्तुविक्रेतारः, सहायकाः, रसिकजनाः सर्वे सन्ति शिवस्वरूपाः। इत्यतः नाटकमस्ति महाशिवम्।

**एतदस्ति नाटकस्य पावित्र्यम्।**

नाटकेन जनकल्याणं, लोकजागरा, समाराधनं, जीवने अभावनिरसनम्। नाट्योद्देशसफलतायै नाट्यजनेषु सामञ्जस्यम् अनुशासनं, लोककल्याणेच्छा, समर्पणभावः इत्यादिकम् आवश्यकम्। ममैव नाट्याय लभतां यशः इत्येषः आग्रहः अथवा ममैव नाट्यमुत्तमम् एषः उन्मादः लोकेषु नाट्यविषये जनयति कालुष्यम्। तेन नाट्यजनविषये अनादरः औदासीन्यञ्च। नाट्ये प्रमाणं स्तः नेत्रे। नेत्राभ्यां सूक्ष्मभावग्रहणम्। अतः नाट्यजनैः सावधानीभूत्वा नटेश्वरः आराध्यः। सत्कथापरकनाट्येन सद्विचारसङ्ग्रहः।

तेन पवित्रकार्याय प्रेरणा। इत्यर्थं समर्पणभावेन जागरूकतया च पवित्रं नाट्यकार्यं विधातव्यम्।

## सन्दर्भसूचि:


१. दशरूपकम् ३.१

२. नाट्यशास्त्रम् १.११२

३. नाट्यशास्त्रम् १.११५

४. नाट्यशास्त्रम् १.११६

५. नाट्यशास्त्रम् १.११७

६. बृहदारण्यकोपनिषद् २.४.४

७. मालविकाग्निमित्रम् १.४

८. बृहदारण्यकोपनिषद् २.४.४

९. नाट्यशास्त्रम् १.११२

१०. नाट्यशास्त्रम् ३६.७८

११. श्रीमद्भगवद्गीता ७.४, ५

१२. श्रीमद्भगवद्गीता १०.३९

१३. श्रीमद्भगवद्गीता १०.४०

१४. अभिज्ञानशाकुन्तलम् १.१